St. Petersburg University
Historico-Philological Faculty
vol. 16

# ЗАПИСКИ

## ИСТОРИКО-ФИЛОЛОГИЧЕСКАГО ФАКУЛЬТЕТА

## ИМПЕРАТОРСКАГО

## С.-ПЕТЕРБУРГСКАГО УНИВЕРСИТЕТА.

---

## ЧАСТЬ XVI.


САНКТПЕТЕРБУРГЪ.
ТИПОГРАФІЯ ИМПЕРАТОРСКОЙ АКАДЕМІИ НАУКЪ.
(Вас. Остр., 9 лин., № 12.)
1887.

сборника разсказовъ. Рукопись неполная и безъ заглавія. Обозначается въ библіографическомъ указателѣ подъ заглавіемъ «катхâнаки».

*Стр. 123.* Относящіяся сюда надписи см. въ изданіи Ed. Müller, Ancient Inscriptions in Ceylon, стр. 33 и сл.

*Стр. 156.* Въ изданіи Paul Steinthal'а это мѣсто находится на стр. 36.

*Стр. 180.* Примѣч. 2. См. изданіе Dr. Morris'а, стр. 53, 55, 57, 59, 61, 64, 66.

---

St. Petersburg
Imperial Academy of Sciences

# БУДДИЗМЪ.

## ИЗСЛѢДОВАНІЯ И МАТЕРІАЛЫ.

СОЧИНЕНІЕ

**И. П. МИНАЕВА.**

अल्पमपि कृतशक्तिर्यामि संबुद्धमार्गं
नभसि गरुडयाते किं न यान्ति द्विरेफाः ॥

ТОМЪ I. ВЫПУСКЪ II.

МАХÂВЈУТПАТТИ.
У-И-ХЭ-БИ-ЦЗИ-ЯО.
НÂМАСАṂГÎТИ.

ТАБЛИЦА.

САНКТПЕТЕРБУРГЪ.
ТИПОГРАФІЯ ИМПЕРАТОРСКОЙ АКАДЕМІИ НАУКЪ.
Вас. Остр., 9 лин., № 12.
1887.

Печатано по опредѣленію Историко-Филологическаго Факультета Императорскаго С.-Петербургскаго Университета 4 Сентября 1887 г.

За Декана *И. Помяловскій.*

# ОГЛАВЛЕНІЕ.

Стр.

Предисловіе ........ I—XII.

I. Махâвјутпатти ........ 1.

II. У-и-хэ-би-цзи-яо ........ 119.

III. Нâмасамгîти ........ 135.

। २११ । दुर्गतयः ॥ ॥ २१२–२१५ ॥*
। २१६ । अष्टादश विद्यास्थानानि ॥ ॥ २१७–२२० ॥*
। २२१ । ब्राह्मणविद्दरकर्मः (sic) ॥ ॥ २२२–२२३ ॥*
। २२४ । स्वर्गकामादीनां नामानि ॥ ॥ २२५–२३० ॥*
। २३१ । औषधिनामानि ॥
। २३२ । वस्त्रनामानि ॥
। २३३ । परिष्कारनामानि ॥
। २३४ । रङ्गनामानि ॥
। २३५ । मणिरत्ननामानि ॥
। २३६ । शङ्खादिनामानि ॥
। २३७ । सर्वालंकारनामानि ॥ ॥ २३८ ॥*
। २३९ । पूजापरिष्काराः ॥
। २४० । पुष्पनामानि ॥
। २४१ । पुष्पमुलति (sic) नामानि ॥
। २४२ । पुष्पगुणनामानि ॥
। २४३ । सर्वधूपनामानि ॥ ॥ २४४–२४५ ॥*
। २४६ । अर्यमहाविशलत्रधयवतनसकमूत्र-त्नवित्तगणना (!) नामानि ॥ ॥२४७–२५५ ॥*
। २५६ । दिग्विदिग्नामानि[1]) ॥ ॥ २५७ – २८३ ॥*
। २८४ । व्याधिनामानि ॥

Всѣ рукописи сообщаютъ одинъ и тотъ же текстъ, но съ массою описокъ; часть ихъ помѣщена въ подстрочныхъ примѣчаніяхъ; болѣе значительный выборъ такого рода варіантовъ будетъ представленъ при переводѣ, въ мѣстахъ, очевидно, дошедшихъ до насъ въ сильно искаженномъ видѣ, или же допускающихъ исправленія и возстановленія текста приблизительно первоначальнаго.

**II.** Для втораго сочиненія, озаглавленнаго по китайски: *У-и-хэ-би-изи-яо*, имѣлось одно китайское изданіе изъ Библіотеки Императорскаго Санктпетербургскаго Университета (подъ № 25149 въ рукописномъ каталогѣ). Санскритскій текстъ этого изданія весьма испорченъ и могъ быть только отчасти возстановленъ съ помощью Махâвjутпатти. Сомнительныхъ или вполнѣ

* Безъ скр. заглавія.

1) D. U. धिगविधिगना°





испорченныхъ и непонятныхъ чтеніи въ обоихъ сочиненіяхъ, къ сожаленію, весьма много; въ изданіи они отмѣчены *.

Сочиненіе это было обстоятельно описано Абель Ремюза (см. Mélanges Asiatiques par Abel Rémusat, Tome I, стр. 153 и сл.). Тоже изданіе находится въ Азіатскомъ Музеѣ Императорской Академіи Наукъ. См. O. Boehtlingk l. c., стр. 343.

**III.** Текстъ Нâмасамгîти изданъ по слѣд. рукописямъ:

**U.** Сборникъ нѣсколькихъ буддійскихъ текстовъ на санскритскомъ языкѣ. Китайское изданіе. Въ каталогѣ библіотеки Императорскаго Санктпетербургскаго Университета занесенъ подъ № 25419. По всей вѣроятности такое же изданіе упоминается М. Мюллеромъ въ Anecdota Oxoniensia, vol. I, part. III, стр. 34. Подробное описаніе сборника будетъ помѣщено при переводѣ, во второмъ томѣ.

Текстъ издаваемой статьи отличается исправностью. — Въ концѣ статьи приписка, которой нѣтъ въ другихъ изданіяхъ. См. стр. 152.

**M.** Рукопись новая изъ Катманду, писана непальскою азбукою, на желтой непальской же бумагѣ. Собственность издателя. Много описокъ; л. 1—27; по 5 строкъ на страницѣ.

На листѣ 27 пр. нѣсколько строкъ испорченнаго санскритскаго текста.

На томъ же листѣ (об.) дата:

संवत् ९३८ स्ति आषाढ वदि १ रोज १ सपुर्णाया ज्ञादिनज्ञुलो ॥

**P.** Китайское изданіе. Въ каталогѣ университетской библіотеки подъ № 20314. — Санскритскій текстъ напечатанъ двумя шрифтами: *ланчою* и тибетскою азбукою. На первомъ листѣ: आर्यमञ्जुश्रीनामसंगीति विहरति स्म На послѣднемъ 39-мъ: भगवतो मञ्जुश्रीज्ञानसत्वस्य परमार्थनामसंगीति । भगवान्तथागतशाक्यमुनिर्भाषिता समाप्ताः ।

**D.** Другой экземпляръ того же изданія находится въ библіотеки Императорскаго азіатскаго музея. См. Dorn, Das Asia-

tische Museum, стр. 731. Въ обоихъ экземплярахъ текстъ сходенъ съ У.

**К.** *Âryanâmasaṃgîtiṭîkâ* изъ библіотеки Имп. Санктпетербургскаго Университета, л. 1—130; по 8 и 9 строкъ на страницѣ. Непальская азбука. Рукопись новая, безъ даты. Объ этомъ комментаріи см. Bendall, Catalogue, стр. 203. Въ примѣчаніяхъ къ переводу будутъ сообщены выдержки изъ него.

# III.

॥ ओँ नमो मञ्जुनाथाय[1] ॥

अथ वज्रधरः श्रीमान्दुर्दान्तदमकः परः ।
त्रिलोकविजयी[2] वीरो गुह्यराट्कुलिशेश्वरः ॥ १ ॥
विबुद्धपुण्डरीकाक्षः प्रोत्फुल्लकमलाननः ।
प्रोल्लालयन्वज्रवरं स्वकरेण मुहुर्मुहुः ॥ २ ॥
भृकुटीतरङ्गप्रमुखैरनन्तैर्वज्रपाणिभिः ।
दुर्दान्तदमकैर्वीरैर्वीरबीभत्सरूपिभिः ॥ ३ ॥
उल्लालयद्भिः स्वकरैः प्रस्फुरद्वज्रकोटिभिः ।
प्रज्ञोपायमहाकरुणाजगदर्थकरैः परैः ॥ ४ ॥
हृष्टतुष्टाशयैर्मुदितैः क्रोधविग्रहरूपिभिः
बुद्धकृत्यकरैर्नाथैः सार्धं प्रणतविग्रहैः ॥ ५ ॥
प्रणम्य नाथं संबुद्धं भगवन्तं तथागतं ।
कृताञ्जलिपुटो भूत्वा इदमाह स्थितो ऽग्रतः ॥ ६ ॥
मद्धिताय ममार्थाय मे[3] ऽनुकम्पाय हे[4] विभो ।
मायाजालाभिसंबोधेर्यथा[5] लाभी भवाम्यहं ॥ ७ ॥

---

1) М. श्री° Р. मञ्जुश्रीकुमारभूताय — 2) У. वि°; М. त्रैलोक्य° — 3) У. — Р. нѣтъ. अनुक°. — 4) К. — Р. मे — У. म — М. म्य — 5) Р. °धिर्यथा

अज्ञानपङ्कमग्नानां क्लेशव्याकुलचेतसां ।
हिताय सर्वसत्त्वानामनुत्तरफलाप्तये ॥ ८ ॥
प्रकाशयतु संबुद्धो भगवां शास्ता जगद्गुरुः ।
महासमयतत्त्वज्ञ इन्द्रियाशयवित्परः ॥ ९ ॥
भगवं ज्ञानकायस्य महोष्णीषस्य गीष्पतेः ।
मञ्जुश्रीज्ञानसत्त्वस्य ज्ञानमूर्तेः स्वयंभुवः ॥ १० ॥
गम्भीरार्थामुदारार्थां महार्थामसमां शिवां ।
आदिमध्यान्तकल्याणीं नामसंगीतिमुत्तमां ॥ ११ ॥
यातीतैर्भाषिता बुद्धैर्भाषिष्यन्ते ह्यनागताः ।
प्रत्युत्पन्नाश्च संबुद्धा यां भाषन्ते पुनः पुनः ॥ १२ ॥
मायाजालमहातन्त्रे या चास्मिं संप्रगीयते ।
महावज्रधरैः हृष्टैरमेयैर्मन्त्रधारिभिः ॥ १३ ॥
अहं चैनां धारयिष्याम्यानिर्याणाद्दृढाशयः[1] ।
यथा भवाम्यहं नाथ सर्वसंबुद्धगुह्यधृक् ॥ १४ ॥
प्रकाशयिष्ये सत्त्वानां यथाशयविशेषतः ।
अशेषक्लेशनाशाय अशेषाज्ञानहानये ॥ १५ ॥
एवमध्येष्य गुह्येन्द्रो वज्रपाणिस्तथागतं ।
कृताञ्जलिपुटो भूत्वा प्रह्वकायस्थितो ऽग्रतः ॥ १६ ॥

अध्येषणागाथाः[2] षोडश ॥

अथ शाक्यमुनिर्भगवां संबुद्धो द्विपदोत्तमः ।
निर्णमय्यायतां स्फीतां स्वजिह्वां स्वमुखाच्छुभां ॥ १ ॥
स्मितं संदर्श्य लोकानामपायत्रयशोधनं ।
त्रैलोक्याभासकरणं चतुर्मारारिशासनं ॥ २ ॥

1) Такъ К. — Р. У. °णां° — 2) М. अध्येषणाज्ञान°.





त्रिलोकमापूरयन्त्या[1] ब्राह्मया मधुरया गिरा ।
प्रत्यभाषत गुह्येन्द्रं वज्रपाणिं महाबलं ॥ ३ ॥
साधु वज्रधर[2] श्रीमां साधु ते वज्रपाणये ।
यस्त्वं जगद्धितार्थाय महाकरुणयान्वितः ॥ ४ ॥
महार्थां नामसंगीतिं पवित्रामघनाशनीं ।
मञ्जुश्रीज्ञानकायस्य मत्तः[3] श्रोतुं समुद्यतः ॥ ५ ॥
तत्साधु देशयाम्येष अहं ते गुह्यकाधिप ।
शृणु त्वमेकाग्रमनास्तत्साधु भगवन्निति ॥ ६ ॥

॥ प्रतिवचनगाथाः षट् ॥

अथ शाक्यमुनिर्भगवां सकलं मन्त्रकुलं महत् ।
मन्त्रविद्याधरकुलं व्यवलोक्य[4] कुलत्रयं ॥ १ ॥
लोकलोकोत्तरकुलं लोकालोककुलं महत् ।
महामुद्राकुलं चाग्र्यं महोष्णीषकुलं महत् ॥ २ ॥

॥ षट्कुलावलोकनगाथे द्वे ॥

इमां षड्मन्त्रराजनसंयुक्तामद्वयोदयां ।
अनुत्पादधर्मिणीं गाथां भाषते स्म गिरांपतेः ॥ १ ॥
अ आ इ ई उ ऊ ए ऐ ओ औ अं अः स्थितो हृदि[5] ।
ज्ञानमूर्तिरहं बुद्धो बुद्धानां त्र्यध्ववर्तिनां ॥ २ ॥
ओं वज्रतीक्ष्णदुःखच्छेदप्रज्ञाज्ञानमूर्तये ।
ज्ञानकायवागीश्वर अरपचनाय ते नमः ॥ ३ ॥

॥ मायाजालाभिसंबोधिक्रमगाथास्तिस्रः ॥

1) М. त्रैलोक्य — 2) У. Р. °रः — М. — 3) М. मत्त — 4) М. देवलोके — 5) हृद-यरहंबुद्धो

तद्यथा भगवां बुद्धः संबुद्धो ऽकारसंभवः ।
अकारः सर्ववर्णाग्र्यो महार्थः परमाक्षरः ॥ १ ॥
महाप्राणो ह्यनुत्पादो वागुदाहारवर्जितः ।
सर्वाभिलापहेत्वग्र्यः सर्ववाक्सुप्रभास्वरः ॥ २ ॥
महामहमहारागः सर्वसत्त्वरतिंकरः ।
महामहमहाद्वेषः सर्वक्लेशमहारिपुः ॥ ३ ॥
महामहमहामोहो मूढधीमोहसूदनः ।
महामहमहाक्रोधो महाक्रोधरिपुर्महान् ॥ ४ ॥
महामहमहालोभः सर्वलोभनिसूदनः ।
महाकामो महासौख्यो महामोहो महारतिः ॥ ५ ॥
महारूपो महाकायो महावर्णो महावपुः ।
महानामा महोदारो महाविपुलमण्डलः ॥ ६ ॥
महाप्रज्ञायुधधरो महाक्लेशाङ्कुशो ऽग्रणीः ।
महायशा महाकीर्तिर्महाज्योतिर्महाद्युतिः ॥ ७ ॥
महामायाधरो विद्वान्महामायार्थसाधकः ।
महामायारतिरतो महामायेन्द्रजालिकः ॥ ८ ॥
महादानपतिः श्रेष्ठो महाशीलधरो ऽग्रणीः ।
महाक्षान्तिधरो धीरो[1]) महावीर्यपराक्रमः ॥ ९ ॥
महाध्यानसमाधिस्थो महाप्रज्ञाशरीरधृक् ।
महाबलो महोपायः प्रणिधिज्ञानसागरः ॥ १० ॥
महामैत्रीमयो ऽमेयो महाकारुणिको ऽग्रधीः ।
महाप्राज्ञो महाधीमां महोपायो महाकृतिः ॥ ११ ॥
महर्द्धिबलोपेतो महावेगो महाजवः ।
महर्द्धिको महेशाख्यो महाबलपराक्रमः ॥ १२ ॥

1) Y. वीरो





महाभवाद्रिसंभेत्ता महावज्रधरो घनः ।
महाक्रूरो महारौद्रो महाभयभयंकरः ॥ १३ ॥
महाविद्योत्तमो नाथो महामन्त्रोत्तमो गुरुः ।
महायाननयारूढो महायाननयोत्तमः ॥ १४ ॥

॥ वज्रधातुमहामण्डलगाथाश्चतुर्दश[1]) ॥

महावैरोचनो बुद्धो महामौनी महामुनिः ।
महामन्त्रनयोद्भूतो महामन्त्रनयात्मकः ॥ १ ॥
दशपारमिताप्राप्तो दशपारमिताश्रयः ।
दशपारमिताशुद्धिर्दशपारमितानयः ॥ २ ॥
दशभूमीश्वरो नाथो दशभूमिप्रतिष्ठितः ।
दशज्ञानविशुद्धात्मा दशज्ञानविशुद्धधृक् ॥ ३ ॥
दशाकारो दशार्थार्थो मुनीन्द्रो दशबलो विभुः ।
अशेषविश्वार्थकरो दशाकारवशी[2]) महान् ॥ ४ ॥
अनादिर्निष्प्रपञ्चात्मा शुद्धात्मा तथतात्मकः ।
भूतवादी यथावादी तथाकारी अनन्यवाक् ॥ ५ ॥
अद्वयो ऽद्वयवादी च भूतकोटिव्यवस्थितः ।
नैरात्म्यसिंहनिनादी[3]) कुतीर्थ्यमृगभीकरः ॥ ६ ॥
सर्वत्रगो ऽमोघगतिस्तथागतमनोजवः ।
जिनो जितारिर्विजयी चक्रवर्ती महाबलः ॥ ७ ॥
गणमुख्यो गणाचार्यो गणेशो[4]) गणपतिर्वशी ।
महानुभावो धौरेयो ऽनन्यनेयो महानयः ॥ ८ ॥
वागीशो वाक्पतिर्वाग्मी वाचस्पतिरनन्तगीः ।
सत्यवाक् सत्यवादी च चतुःसत्योपदेशकः ॥ ९ ॥

1) Y. °माण्डलज्ञान°. — 2) P. Y. °रो व° — 3) K. — P. Y. °दः — 4) M. गणेश्वर

अवैवर्तिको ह्यनागामी खड्गः प्रत्येकनायकः ।
नानानिर्याणनिर्यातो महाभूतैककारणः ॥ १० ॥
अर्हन् क्षीणास्रवो भिक्षुर्वीतरागो जितेन्द्रियः ।
क्षेमप्राप्तो ऽभयप्राप्तः शीतीभूतो ह्यनाविलः ॥ ११ ॥
विद्याचरणसंपन्नः सुगतो लोकवित्परः ।
निर्ममो निरहंकारः सत्यद्वयनये स्थितः ॥ १२ ॥
संसारपारकोटिष्ठः[1] कृतकृत्यः स्थले स्थितः ।
कैवल्यज्ञाननिष्ठ्यूतः प्रज्ञाशस्त्रो विदारणः ॥ १३ ॥
सद्धर्मो धर्मराड् भास्वां लोकालोककरः परः ।
धर्मेश्वरो धर्मराजा श्रेयो मार्गोपदेशकः ॥ १४ ॥
सिद्धार्थः सिद्धसंकल्पः सर्वसंकल्पवर्जितः ।
निर्विकल्पो ऽक्षयो धातुर्धर्मधातुः परो ऽव्ययः ॥ १५ ॥
पुण्यवान्पुण्यसंभारो ज्ञानं ज्ञानाकरो[2] महत्[3] ।
ज्ञानवान्सदसज्ज्ञानी संभारद्वयसंभृतः ॥ १६ ॥
शास्वतो विश्वराड् योगी ध्यानं ध्येयो धियांपतिः ।
प्रत्यात्मवेद्यो ह्यचलः परमाद्यस्त्रिकायधृक् ॥ १७ ॥
पञ्चकायात्मको बुद्धो पञ्चज्ञानात्मको विभुः ।
पञ्चबुद्धात्ममकुटः[4] पञ्चचक्षुरसङ्गधृक् ॥ १८ ॥
जनकः सर्वबुद्धानां बुद्धपुत्रः परो वरः ।
प्रज्ञाभवोद्भवो योनिर्धर्मयोनिर्भवान्तकृत् ॥ १९ ॥
घनैकसारो वज्रात्मा सद्योजातो[5] जगत्पतिः ।
गगनोद्भवः स्वयंभूः प्रज्ञाज्ञानानलो महान् ॥ २० ॥

1) Y. °स्थः — 2) K. ज्ञानोत्तरं — 3) Y. महाम् — 4) P. K. — Y. °मुकुटः — 5) Y. सद्या°





वैरोचनो महादीप्तिर्ज्ञानज्योतिर्विरोचनः ।
जगत्प्रदीपो ज्ञानोल्को महातेजाः प्रभास्वरः ॥ २१ ॥
विद्याराजो ऽग्रमन्त्रेशो मन्त्रराजा महार्थकृत् ।
महोष्णीषोद्भूतोष्णीषो विश्वदर्शी वियत्पतिः ॥ २२ ॥
सर्वबुद्धात्मभावाग्र्यो जगदानन्दलोचनः ।
विश्वरूपी विधाता च पूज्यो मान्यो महाऋषिः ॥ २३ ॥
कुलत्रयधरो मन्त्री महासमयमन्त्रधृक् ।
रत्नत्रयधरः[1] श्रेष्ठस्त्रियानोत्तमदेशकः ॥ २४ ॥
अमोघपाशो विजयी वज्रपाशो महाग्रहः ।
वज्राङ्कुशो महापाशो वज्रभैरवभीकरः ॥ २५ ॥
॥ सुविशुद्धधर्मधातुज्ञानगाथाः पञ्चविंशतिः ॥

क्रोधराट् षण्मुखो भीमः षड्नेत्रः षड्भुजो बली ।
दंष्ट्राकरालकङ्कालो हलाहलशताननः ॥ १ ॥
यमान्तको विघ्नराड्[2] वज्रवेगो भयंकरः ।
विघुष्टवज्रो हृद्वज्रो मायावज्रो महोदरः ॥ २ ॥
कुलिशेशो वज्रयोनिर्वज्रमण्डो नभोपमः ।
अचलैकजटाटोपो गजचर्मपटार्द्रधृक् ॥ ३ ॥
हाहाकारो महाघोरो हीहीकारो भयानकः ।
अट्टहासो महाहासो वज्रहासो महारवः ॥ ४ ॥
वज्रसत्त्वो महासत्त्वो वज्रराजो महासुखः ।
वज्रचण्डो महामोदो वज्रहूँकार हूँकृतिः ॥ ५ ॥
वज्रबाणायुधधरो वज्रखड्गो निकृन्तनः ।
विश्ववज्रधरो वज्री एकवज्री रणंजहः ॥ ६ ॥

1) Y. °त्रया° — 2) M. °राज

वज्रज्वालाकरालाक्षो वज्रज्वालाशिरोरुहः ।
वज्रावेशो महावेशः शताक्षो वज्रलोचनः ॥ ७ ॥
वज्ररोमाङ्कुरतनुर्वज्ररोमैकविग्रहः ।
वज्रकोटिनखारम्भो वज्रसारघनच्छविः ॥ ८ ॥
वज्रमालाधरः श्रीमां वज्राभरणभूषितः[1] ।
हाहाट्टहासो निर्घोषो वज्रघोषः षडक्षरः ॥ ९ ॥
मञ्जुघोषो महानादस्त्रैलोक्यैकरवो महान् ।
आकाशधातुपर्यन्तो घोषो घोषवतां वरः ॥ १० ॥

॥ आदर्शज्ञानस्तुतिगाथा दश ॥

तथताभूतनैरात्म्यं भूतकोटिरनक्षरः ।
शून्यतावादी वृषभो गम्भीरोदारगर्जनः ॥ १ ॥
धर्मशङ्खो महाशब्दो धर्मगण्डी महारणः ।
अप्रतिष्ठितनिर्वाणो दशदिग्धर्मदुन्दुभिः ॥ २ ॥
अरूपो रूपवानग्र्यो नानारूपो मनोमयः ।
सर्वरूपावभासश्रीरशेषप्रतिबिम्बधृक् ॥ ३ ॥
अप्रधृष्यो महेशाख्यस्त्रैधातुकमहेश्वरः ।
समुच्छ्रितार्यमार्गस्थो धर्मकेतुर्महोदयः ॥ ४ ॥
त्रैलोक्यैककुमाराङ्गः स्थविरो वृद्धः प्रजापतिः ।
द्वात्रिंशल्लक्षणधरः कान्तस्त्रैलोक्यसुन्दरः ॥ ५ ॥
लोकज्ञानगुणाचार्यो लोकाचार्यो विशारदः ।
नाथस्त्राता त्रिलोकाप्तः शरणं तायी निरुत्तरः ॥ ६ ॥
गगनाभोगसंभोगः सर्वज्ञज्ञानसागरः ।
अविद्याण्डकोशसंभेत्ता भवपञ्जरदारणः ॥ ७ ॥

1) Y. °भूषणः





शमिताशेषसंक्लेशः संसारार्णवपारगः ।
ज्ञानाभिषेकमकुटः सम्यक्संबुद्धभूषणः ॥ ८ ॥
त्रिदुःखदुःखशमनस्त्र्यन्तो ऽनन्तस्त्रिमुक्तिगः ।
सर्वावरणनिर्मुक्त आकाशसमतांगतः ॥ ९ ॥
सर्वक्लेशमलातीतस्त्र्यध्वानध्वगतिंगतः ।
सर्वसत्त्वमहानागो गुणशेखरशेखरः १० ॥
सर्वोपधिविनिर्मुक्तो व्योमवर्त्मनि सुस्थितः ।
महाचिन्तामणिधरः सर्वरत्नोत्तमो विभुः ॥ ११ ॥
महाकल्पतरुः स्फीतो महाभद्रघटोत्तमः ।
सर्वसत्त्वार्थकृत्कर्त्ता हितैषी सत्त्ववत्सलः ॥ १२ ॥
शुभाशुभज्ञः कालज्ञः समयज्ञः समयी विभुः ।
सत्त्वेन्द्रियज्ञो वेलज्ञो विमुक्तित्रयकोविदः ॥ १३ ॥
गुणी गुणज्ञो धर्मज्ञः प्रशस्तो मङ्गलोदयः ।
सर्वमङ्गलमाङ्गल्यः कीर्तिलक्ष्मीर्यशः शुभः ॥ १४ ॥
महोत्सवो महाश्वासो महानन्दो महारतिः ।
सत्कारः सत्कृतिर्भूतिः प्रमोदः श्रीर्यशस्पतिः ॥ १५ ॥
वरेण्यो वरदः श्रेष्ठः शरण्यः शरणोत्तमः ।
महाभयारिः प्रवरो निःशेषभयनाशनः ॥ १६ ॥
शिखी शिखण्डी जटिलो जटी मौण्डी किरीटिमान् ।
पञ्चाननः पञ्चशिखः पञ्चचोरकशेखरः ॥ १७ ॥
महाव्रतधरो मौञ्जी ब्रह्मचारी व्रतोत्तमः ।
महातपास्तपोनिष्ठः स्नातको गौतमो ऽग्रणीः ॥ १८ ॥
ब्रह्मविद्ब्राह्मणो ब्रह्मा ब्रह्मनिर्वाणमाप्तवान् ।
मुक्तिमोक्षो विमोक्षाङ्गो विमुक्तिः शान्तता शिवः ॥ १९ ॥
निर्वाणं निर्वृतिः शान्तिः श्रेयो निर्याणमन्तकः ।
सुखदुःखान्तकृन्निष्ठा वैराग्यमुपधिक्षयः ॥ २० ।

अजयो ऽनुपमो ऽव्यक्तो निराभासो निरञ्जनः ।
निष्कलः सर्वगो व्यापी सूक्ष्मो बीजमनास्रवः ॥ २१ ॥
अरजो विरजो विमलो वान्तदोषो निरामयः ।
सुप्रबुद्धो[1] विबुद्धात्मा सर्वज्ञः सर्ववित्परः ॥ २२ ॥
विज्ञानधर्मतातीतो ज्ञानमद्वयरूपधृक् ।
निर्विकल्पो निराभोगस्त्र्यध्वसंबुद्धकार्यकृत् ॥ २३ ॥
अनादिनिधनो बुद्ध आदिबुद्धो निरन्वयः ।
ज्ञानैकचक्षुरमलो ज्ञानमूर्तिस्तथागतः ॥ २४ ॥
वागीश्वरो महावादी वादिराड् वादिपुंगवः ।
वदतां वरो वरिष्ठो वादिसिंहो ऽपराजितः ॥ २५ ॥
समन्तदर्शी प्रामोद्यस्तेजोमाली सुदर्शनः ।
श्रीवत्सः सुप्रभो दीप्तिर्भाभास्वरकरद्युतिः ॥ २६ ॥
महाभिषग्वरः श्रेष्ठः शल्यहर्ता निरुत्तरः ।
अशेषभैषज्यतरुः क्लेशव्याधिमहारिपुः ॥ २७ ॥
त्रैलोक्यतिलकः कान्तः श्रीमां नक्षत्रमण्डलः ।
दशदिग्व्योमपर्यन्तो धर्मध्वजमहोच्छ्रयः ॥ २८ ॥
जगच्छत्रैकविपुलो मैत्रो करुणामण्डलः ।
पद्मनर्तेश्वरः श्रीमां रत्नच्छत्रो महाविभुः ॥ २९ ॥
सर्वबुद्धमहाराजा सर्वबुद्धात्मभावधृक् ।
सर्वबुद्धमहायोगः सर्वबुद्धैकशासनः ॥ ३० ॥
वज्ररत्नाभिषेकश्रीः सर्वरत्नाधिपेश्वरः ।
सर्वलोकेश्वरपतिः सर्ववज्रधराधिपः ॥ ३१ ॥
सर्वबुद्धमहाचित्तः सर्वबुद्धमनोगतिः ।
सर्वबुद्धमहाकायः सर्वबुद्धसरस्वतिः ॥ ३२ ॥

1) Y. सुप्रति°





वज्रसूर्यो महालोको वज्रेन्दुविमलप्रभः ।
विरागादिमहारागो विश्ववर्णो ज्वलप्रभः ॥ ३३ ॥
संबुद्धवज्रपर्यङ्को बुद्धसंगीतिधर्मधृक् ।
बुद्धपद्मोद्भवः श्रीमां सर्वज्ञज्ञानकोशधृक्[1] ॥ ३४ ॥
विश्वमायाधरो राजा बुद्धविद्याधरो महान् ।
वज्रतीक्ष्णो महाखड्गो विशुद्धः परमाक्षरः ॥ ३५ ॥
दुःखच्छेदमहायानवज्रधर्ममहायुधः ।
जिनजिग्वज्रगाम्भीर्यो वज्रबुद्धिर्यथार्थवित् ॥ ३६ ॥
सर्वपारमितापूरी सर्वभूमिविभूषणः ।
विशुद्धधर्मनैरात्म्यं सम्यग्ज्ञानेन्दुहृत्प्रभः ॥ ३७ ॥
मायाजालमहोद्योगः सर्वतन्त्राधिपः परः ।
अशेषवज्रपर्यङ्को निःशेषज्ञानकायधृक् ॥ ३८ ॥
समन्तभद्रः सुमतिः क्षितिगर्भो जगद्धृतिः ।
सर्वबुद्धमहागर्भो विश्वनिर्माणचक्रधृक् ॥ ३९ ॥
सर्वभावस्वभावाग्र्यः सर्वभावस्वभावधृक् ।
अनुत्पादधर्मविश्वार्थः सर्वधर्मस्वभावधृक् ॥ ४० ॥
एकक्षणमहाप्राज्ञः सर्वधर्मावबोधधृक् ।
सर्वधर्माभिसमयो भूतान्तमुनिरग्रधीः ॥ ४१ ॥
स्तिमितः सुप्रसन्नात्मा सम्यकसंबुद्धबोधिधृक् ।
प्रत्यक्षः सर्वबुद्धानां ज्ञानार्चिः सुप्रभास्वरः ॥ ४२ ॥
॥ प्रत्यवेक्षणाज्ञानगाथा द्वाचत्वारिंशत् ॥

इष्टार्थसाधकः परः सर्वापायविशोधकः ।
सर्वसत्त्वोत्तमो नाथः सर्वसत्त्वप्रमोचकः ॥ १ ॥

1) M. °कोष°

क्लेशसंग्रामशूरैकः अज्ञानरिपुदर्पहा[1]।
धीः शृङ्गारधरः श्रीमां वीरबीभत्सरूपधृक् ॥ २ ॥
बाहुदण्डशतात्क्षेपपदनिक्षेपनर्तनः[2]।
श्रीमच्छतभुजाभोगो गगनाभोगनर्तनः ॥ ३ ॥
एकपादतलाक्रान्तमहीमण्डतले स्थितः।
ब्रह्माण्डशिखराक्रान्तपादाङ्गुष्ठनखे स्थितः ॥ ४ ॥
एकार्थो ऽद्वयधर्मार्थः परमार्थो ऽविनश्वरः।
नानाविज्ञप्तिरूपार्थश्चित्तविज्ञानसन्ततिः ॥ ५ ॥
अशेषभावार्थरतिः शून्यतारतिरग्रधीः।
भवरागाद्यतीतश्च भवत्रयमहारतिः ॥ ६ ॥
शुद्धः शुभ्राभ्रधवलः शरच्चन्द्रांशुसुप्रभः।
बालार्कमण्डलच्छायो महारागनखप्रभः ॥ ७ ॥
इन्द्रनीलाग्रसच्चीरो महानीलकचाग्रधृक्।
महामणिमयूखश्रीर्बुद्धनिर्माणभूषणः ॥ ८ ॥
लोकधातुशताकम्पी ऋद्धिपादमहाक्रमः।
महास्मृतिधरस्तत्त्वश्चतुःस्मृतिसमाधिराट् ॥ ९ ॥
बोध्यङ्गकुसुमामोदस्तथागतगुणोदधिः[3]।
अष्टाङ्गमार्गनयवित्सम्यक्संबुद्धमार्गवित् ॥ १० ॥
सर्वसत्त्वमहासङ्गो निःसङ्गो गगनोपमः।
सर्वसत्त्वमनोजातः सर्वसत्त्वमनोजवः ॥ ११ ॥
सर्वसत्त्वेन्द्रियार्थज्ञः सर्वसत्त्वमनोहरः।
पञ्चस्कन्धार्थतत्त्वज्ञः पञ्चस्कन्धविशुद्धधृक् ॥ १२ ॥
सर्वनिर्याणकोटिस्थः सर्वनिर्याणकोविदः।
सर्वनिर्याणमार्गस्थः सर्वनिर्याणदेशकः ॥ १३ ॥

1) Y. °हः — 2) Y. °पः — 3) Y. °धीः





द्वादशाङ्गभवोत्खातो द्वादशाकारशुद्धधृक्।
चतुःसत्यनयाकारो ऽष्टज्ञानावबोधधृक् ॥ १४ ॥
द्वादशाकारसत्यार्थः षोडशाकारतत्त्ववित्।
विंशत्याकारसंबोधिर्विबुद्धः सर्ववित्परः ॥ १५ ॥
अमेयबुद्धनिर्माणकायकोटिविभावकः।
सर्वक्षणाभिसमयः सर्वचित्तक्षणार्थवित् ॥ १६ ॥
नानायाननयोपायजगदर्थविभावकः।
यानत्रितयनिर्यात एकयानफले स्थितः ॥ १७ ॥
क्लेशधातुविशुद्धात्मा कर्मधातुक्षयंकरः।
ओघोदधिसमुत्तीर्णो योगकान्तारनिःसृतः[1] ॥ १८ ॥
क्लेशोपक्लेशसंक्लेशसुप्रहीणसवासनः।
प्रज्ञोपायमहाकरुणा अमोघजगदर्थकृत् ॥ १९ ॥
सर्वसंज्ञाप्रहीणार्थो[2] विज्ञानार्थो निरोधधृक्।
सर्वसत्त्वमनोविषयः सर्वसत्त्वमनोगतिः ॥ २० ॥
सर्वसत्त्वमनो ऽन्तस्थस्तच्चित्तसमतांगतः।
सर्वसत्त्वमनोह्लादी सर्वसत्त्वमनोरतिः ॥ २१ ॥
सिद्धान्तविभ्रमापेतः[3] सर्वभ्रान्तिविवर्जितः।
निःसन्दिग्धमतिस्त्र्यर्थः सर्वार्थस्त्रिगुणात्मकः ॥ २२ ॥
पञ्चस्कन्धार्थस्त्रिकालः सर्वक्षणविभावकः।
एकक्षणाभिसंबुद्धः सर्वबुद्धस्वभावधृक् ॥ २३ ॥
अनङ्गकायः कायाग्र्यः कायकोटिविभावकः।
अशेषरूपसंदर्शी रत्नकेतुर्महामणिः ॥ २४ ॥
॥ समताज्ञानगाथाश्चतुर्विंशतिः ॥

1) Y. निसृतः — 2) Y. प्रहा° — 3) M. Y. सिद्धान्तो, K. °मापगतः, M. °मागत

सर्वसंबुद्धबोद्धव्यो[1]) बुद्धबोधिरनुत्तरः ।
अनक्षरो मन्त्रयोनिर्महामन्त्रकुलत्रयः ॥ १ ॥
सर्वमन्त्रार्थजनको महाबिन्दुरनक्षरः ।
पञ्चाक्षरो महाशून्यो बिन्दुशून्यः षडक्षरः ॥ २ ॥
सर्वाकारनिराकारः[2]) षोडशार्धार्धबिन्दुधृक् ।
अकलः कलनातीतश्चतुर्थध्यानकोटिधृक् ॥ ३ ॥
सर्वध्यानकलाभिज्ञः[3]) समाधिकुलगोत्रवित् ।
समाधिकायकायाग्र्यः सर्वसंभोगकायराट् ॥ ४ ॥
निर्माणकायकायाग्र्यो बुद्धनिर्माणवंशधृक् ।
दशदिग्विश्वनिर्माणो यथावज्जगदर्थकृत् ॥ ५ ॥
देवातिदेवो देवेन्द्रः सुरेन्द्रो दानवाधिपः ।
अमरेन्द्रः सुरगुरुः प्रमथः प्रमथेश्वरः ॥ ६ ॥
उत्तीर्णभवकान्तार एकः शास्ता जगद्गुरुः ।
प्रख्यातदशदिग्लोकधर्मदानपतिर्महान्[4]) ॥ ७ ॥
मैत्रीसंनाहसंनद्धः करुणावर्मवर्मितः[5]) ।
प्रज्ञाखड्गधनुर्बाणः क्लेशाज्ञानरणंजहः ॥ ८ ॥
मारारिर्मारजिद्वीरश्चतुर्मारभयान्तकृत् ।
सर्वमारचमूजेता संबुद्धो लोकनायकः ॥ ९ ॥
वन्द्यः पूज्योऽभिवाद्यश्च माननीयश्च नित्यशः ।
अर्चनीयतमो मान्यो नमस्यः परमो गुरुः ॥ १० ॥
त्रैलोक्यैकक्रमगतिर्व्योमापर्यन्तविक्रमः ।
त्रैविद्यः श्रोत्रियः पूतः षडभिज्ञः षडनुस्मृतिः ॥ ११ ॥

---

1) y. °बोध्यग्यो — 2) y. सर्वाकारो — 3) y. °काला° — 4) y. प्रख्यातो —
5) M. °धर्म°





बोधिसत्त्वो महासत्त्वो लोकातीतो महर्द्धिकः ।
प्रज्ञापारमितानिष्ठः प्रज्ञातत्त्वत्वमागतः ॥ १२ ॥
आत्मवित्परवित्सर्वः सर्वगोयो ह्यग्रपुद्गलः ।
सर्वोपमामतिक्रान्तो ज्ञेयो ज्ञानाधिपः परः ॥ १३ ॥
धर्मदानपतिः श्रेष्ठश्चतुर्मुद्रार्थदेशकः ।
पर्युपास्यतमो जगतां निर्याणत्रययायिनां ॥ १४ ॥
परमार्थविशुद्धश्रीस्त्रैलोक्यसुभगो महान् ।
सर्वसंपत्करः श्रीमान्मञ्जुश्रीः श्रीमतां वरः ॥ १५ ॥
॥ कृत्यानुष्ठानज्ञानगाथाः पञ्चदश ॥

नमस्ते वरद वज्राग्र भूतकोटि नमोऽस्तु ते ।
नमस्ते शून्यतागर्भ बुद्धबोधि नमोऽस्तु ते ॥ १ ॥
बुद्धराग नमस्तेऽस्तु बुद्धकाय[1]) नमो नमः ।
बुद्धप्रीति नमस्तुभ्यं बुद्धमोद नमो नमः ॥ २ ॥
बुद्धस्मित नमस्तुभ्यं बुद्धहास नमो नमः ।
बुद्धवाच नमस्तेऽस्तु बुद्धभाव नमो नमः ॥ ३ ॥
अभवोद्भव[2]) नमस्तेऽस्तु नमस्ते बुद्धसंभव ।
गगनोद्भव नमस्तुभ्यं नमस्ते ज्ञानसंभव ॥ ४ ॥
मायाजाल नमस्तुभ्यं नामस्ते बुद्धनाटक ।
नमस्ते सर्वसर्वेभ्यो ज्ञानकाय नमोऽस्तु ते ॥ ५ ॥
॥ इति पञ्चतथागतज्ञानस्तुतिगाथाः पञ्च ॥

इयमसौ वज्रपाणे वज्रधर भगवतो ज्ञानमूर्तेः सर्वतथागतज्ञानकायस्य मञ्जुश्रीज्ञानसत्त्वस्यावेणिकपरिशुद्धा नामसंगीतिस्तवानुत्तरप्रीतिप्रसादमहौद्बिल्य[3]संजननार्थं कायवाङ्-

---

1) y. °काम — 2) y. अभा° — 3) P'. °द्विग्न —

नोगुह्यपरिशुद्धौ ग्रपरिपूर्णापरिशुद्धभूमिपरिमितापुण्यज्ञानसंभारपरिपूरिपरिशुद्धौ[1] । ग्रनधिगतानुत्तरार्थस्याधिगमाय । ग्रप्राप्तस्य प्राप्त्यै ॥ यावत्सर्वतथागतसद्धर्मनेत्री संधारणार्थं च मया देशिता संप्रकाशिता च विवृत्ता[2] विभजितोत्तानीकृता ग्रधिष्ठिता चेयं मया वज्रपाणे वज्रधर तत्र संताने सर्वमन्त्रधर्मताधिष्ठानेनेति ॥

प्रथमचक्रस्येयमनुशंसा तत्पदान्येकादश ॥

पुनरपरं वज्रपाणे वज्रधर इयं नामसंगीतिः सुविशुद्धपर्यवदातसर्वज्ञज्ञानकायवाङ्म[3]नोगुह्यभूता सर्वतथागतानां बुद्धबोधिः सम्यक्संबुद्धानामभिसमयः ॥ सर्वतथागतानामनुत्तरधर्मधातुगतिः सुगतानां ॥ सर्वमारबलपराजयो जिनानां ॥ दशबलबलिता सर्वदशबलानां ॥ सर्वज्ञता सर्वज्ञानानामागमः सर्वबुद्धधर्माणां ॥ समुदागमः सर्वबुद्धानां ॥ विमलसुपरिशुद्ध[4]पुण्यज्ञानसंभारपरिपूरिः[5] सर्वमहाबोधिसत्त्वानां ॥ प्रसूतिः सर्वश्रावकप्रत्येकबुद्धानां[6] ॥ तेजः सर्वदेवमनुष्यसंपत्तेः ॥ प्रतिष्ठा महायानस्य ॥ संभवो बोधिसत्त्वचर्यायाः ॥ निष्ठा सम्यगार्यमार्गस्य ॥ निकषो विमुक्तीनां[7] । उत्पत्तिर्निर्याणमार्गस्य[7] ॥ ग्रनुच्छेदस्तथागतवंशस्य ॥ प्रवृद्धिर्महाबोधिसत्त्वकुलगोत्रस्य ॥ निग्रहः सर्वपरप्रवादिनां ॥ विध्वंसनं सर्वतीर्थिकानां ॥ पराजयश्चतुर्मारबलचमूसेनायाः ॥ संग्रहः सर्वसत्त्वानां ॥ ग्रार्यमार्गपरिपाकः सर्वनिर्याणयायिनां ॥ समाधिश्चतर्ब्रह्मविहारिणां ॥ ध्यानमेकाग्रचित्तानां ॥ योगः कायवाङ्मनोभियुक्तानां ॥ विसंयोगः सर्वसंयोजनानां ॥ प्रहाणं सर्वक्लेशोपक्लेशानां ॥ व्युपशमः सर्वावरणानां ॥ विमुक्तिः सर्वबन्धनानां ॥ मोक्षः सर्वोपधीनां ॥ शान्तिः सर्वचित्तोपप्लवानां ॥ ग्राकरः सर्वसंपत्तीनां ॥ परिहाणिः सर्वविपत्तीनां[7] पिधनं सर्वापायद्वाराणां ॥ सत्पथो विमुक्तिपुरस्य ॥ ग्रप्रवृत्तिः संसारचक्रस्य ॥ प्रवर्तनं धर्मचक्रस्य ॥ उच्छ्रितच्छत्त्रध्वजपताका[8]स्तथागतशासनस्य ॥ ग्रधिष्ठानं सर्वधर्मदेशनायाः ॥ त्निप्रसिद्धिर्मन्त्रमुखचर्याचारिणां बोधिसत्त्वानां ॥ भावनाधिगमः प्रज्ञापारमिताभियुक्तानां ॥ शून्यताप्रतिवेधः भावनाभियुक्तानां ॥ ग्रद्वयप्रतिवेधः[9] प्रतिभानाभियुक्तानां[9] ॥

1) P′. нѣтъ. — 2) P′. °ता — 3) P′. °परिशु° — 4) P′. °विशुद्धि° — 5) P′. °पूरी — 6) P′. °बुद्धसंपत्तेः — 7) P′. нѣтъ. — 8) P′. °ताकाभिस्त° — 9) K. пропущено.





निष्पत्तिः सर्वपारमितासंभारस्य ॥ परिशुद्धिः सर्वभूमिपारमितापरिपूर्यै[1] ॥ प्रतिवेधः सम्यक्चतुरार्यसत्यानां ॥ सर्वधर्मैकचित्तप्रतिवेधश्चतुःस्मृत्युपस्थानानां ॥ यावत्परिसमाप्तिः सर्वबुद्धगुणानामियं नामसंगीतिः ॥

द्वितीयचक्रस्येयमनुशंसा[2] तत्पदानि द्वापञ्चाशत् ॥

पुनरपरं वज्रपाणे वज्रधर इयं नामसंगीतिः सर्वसत्त्वानामशषेकायवाङ्मनःसमुदाचारपापप्रशमनी ॥ सर्वसत्त्वानां सर्वापायानां विशोधनी[3] ॥ सर्वदुर्गतिनिवारणी ॥ सर्वकर्मावरणानां समुच्छेदनी ॥ सर्वाष्टाक्षणसमुत्पादस्यानुत्पादकरी[4] ॥ ग्रष्टमहाभयव्युपशमनकरी ॥ सर्वदुःस्वप्ननिर्नाशनी[5] ॥ सर्वदुर्निमित्तव्यपोहनकरी ॥ सर्वदुःशकुनविघ्नव्युपशमनकरी[6] ॥ सर्वमारारिकर्मदूरीकरणी ॥ सर्वकुशलमूलपुण्यस्योपचयकरी ॥ सर्वायोनिशोमनस्कारस्यानुत्पादनकरी ॥ सर्वमदमानदर्पाहंकारनिर्घातनकरी ॥ सर्वदुःखदौर्मनस्यानुत्पादनकरी[8] ॥ सर्वतथागतानां हृदयभूता[7] ॥ सर्वबोधिसत्त्वानां गुह्यभूता ॥ सर्वश्रावकप्रत्येकबुद्धानां रहस्यभूता ॥ सर्वमुद्रामन्त्रभूता ॥ सर्वधर्मानभिलाप्यवादिनां स्मृतिसंप्रजन्यसंजननी ॥ ग्रनुत्तरप्रज्ञामेधाकरी[9] ॥ ग्रारोग्यबलैश्वर्यसंपत्करी ॥ ग्रीशुभशान्तिकल्याणप्रवर्धनकरी ॥ यशःश्लोककीर्तिस्तुतिसंप्रकाशनकरी ॥ सर्वव्याधिमहाभयप्रशमनकरी[10] ॥ पूततरा पूततराणां ॥ पवित्रतरा पवित्रतराणां ॥ धन्यतमा धन्यतमानां ॥ सर्वमङ्गलानां माङ्गल्यतमा[11] ॥ शरणं शरणार्थिनां ॥ लयनं लयनार्थिनां ॥ त्राणं त्राणार्थिनां ॥ परायणमपरायणानां[12] ॥ दीपभूता दीपार्थिनां ॥ ग्रगतिकानामनुत्तरगतिभूता ॥ यानपात्रभूता भवसमुद्रपारगामिनां ॥ महाभैषज्यराजभूता सर्वव्याधिनिर्घातनया ॥ प्रज्ञाभूता हेयोपादेयभावविभावनया ॥ ज्ञानालोकभूता सर्वतमोऽन्धकारकुदृष्ट्यपनयनात्[13] ॥ चिन्तामणिभूता सर्वसत्त्वयथाशयाभिप्रायपरिपूरणात्[14] ॥ सर्वज्ञज्ञानभूता मञ्जुश्रीज्ञान-

1) P′. भूमिपरिशुद्धे — 2) K. द्वितीयस्य महावैरोचन(च)क्रस्ये° — 3) P′. °पापप्रशो° — 4) P′. °दनकरी — 5) P′. °प्नविघ्नव्युपशमनकरी — 6) P′. нѣтъ. — 7) K. — P′. вставлено выше. — 8) K. °पादकरी — 9) P′. нѣтъ. — 10) P′. °व्युपश° — 11) P′. °ल्यतमा सर्वमङ्गल्यतमानां — 12) P′. परायणार्थिनां — 13) P′. °नाय — 14) P′. °णाय —

कायप्रतिलम्भाय ॥ परिशुद्धज्ञानदर्शनभूता[1] पञ्चचक्षुःप्रतिलम्भाय ॥ षट्पारमितापरिपूरिभूता ॥ आमिषाभयधर्म[2]दानोत्सर्जनतया[3] ॥ दशभूमिप्रतिलम्भभूता पुण्यज्ञानसंभारसमाधिपरिपूरणतया ॥ अद्वयधर्मताद्वयधर्मविगतत्वात् ॥ तथातारूपतानन्यधर्मताध्यारो[4]पविगतत्वात् ॥ भूतकोटिरूपता परिशुद्धतथागतज्ञानकायस्वभावतया ॥ सर्वाकारमहाशून्यतारूपता अशेषकुदृष्टिगहनगतिनिर्घातनतया[5] ॥ सर्वधर्मानभिलाप्यरूपेयं नामसंगीतिः ॥ यदुताद्वयधर्मतार्थं नामसंधारणप्रकाशनतयेति ॥

तृतीयचक्रस्येयमनुशंसा तत्पदानि द्वापञ्चाशत् ॥

पुनरपरं वज्रपाणे वज्रधर यः कश्चित्कुलपुत्रो वा कुलदुहिता वा मन्त्रमुखचर्याचारी इमां भगवतो मञ्जुश्रीज्ञानसत्त्वस्य सर्वतथागतज्ञानकायस्य[6] ज्ञानमूर्तेरद्वयपरमार्थां नामसंगीतिं नामचूडामणिं सकलपरिसमाप्तामन्यूनामखण्डामेभिरेव पदव्यञ्जनैः प्रत्यहमखण्डं[7] त्रिकालं[8] धारयिष्यति वाचयिष्यति पर्यवाप्स्यति योनिशोमनसिकरिष्यति ॥ परेभ्यश्च यथा योग्यतः संप्रकाशयिष्यति ॥ प्रत्येकं चान्यतमान्यतमनामार्थं मञ्जुश्रीज्ञानकायमालम्बनीकृत्य एकाग्रमानसो भावयिष्यति ॥ अधिमुक्तिकतत्त्वमनस्काराभ्यां समन्तमुखविहारविहारी सर्वधर्मप्रतिवेधिकया परमया अनाविलया प्रज्ञानुविद्धया श्रद्धया समन्वागतः संस्तस्य त्र्यध्वानध्वसमङ्गिनः सर्वबुद्धबोधिसत्त्वाः समागम्य संगम्य सर्वधर्ममुखान्युपदर्शयिष्यन्ति ॥ आत्मभावं चोपदर्शयिष्यन्ति ॥ दुर्दान्तदमकाश्च महाक्रोधराजानो महावज्रधरादयो जगत्परित्राणभूता नानानिर्माणरूपकायैरोजोबलं तेजो ऽप्रधृष्यतां ॥ सर्वमुद्रामन्त्राभिसमयमण्डलान्युपदर्शयिष्यन्ति ॥ अशेषाश्च मन्त्रविद्याराज्यः सर्वविघ्नविनायकमाराणां[9] महाप्रत्यङ्गिरा महापराजिताः सरात्रिंदिवं प्रतिक्षणं सर्वेर्यापथेषु रक्षावरणगुप्तिं करिष्यन्ति[9] ॥ सर्वबुद्धबोधिसत्त्वाधिष्ठानं करिष्यन्ति ॥ सर्वकायवाङ्मनोभिस्तस्य संताने सम्यगधिष्ठास्यन्ति ॥ सर्वबुद्धबोधिसत्त्वानुग्रहेण चानुग्रहीष्यन्ति ॥ सर्वधर्माणां वैशारद्यं तस्य प्रतिभानं तच्चोपसंहरिष्यन्ति ॥ सर्वार्हच्छ्रावकप्रत्येकबुद्धार्यधर्मप्रेमाशयतया आत्म-

---

1) P′. °नादर्श° — 2) K. нѣтъ. — 3) P′. °त्सृ° — 4) P′. °रूपता° — 5) P′. °निर्घोषतया — 6) P′. нѣтъ. — 7) K. нѣтъ. — 8) K. त्रिष्कालं — 9) P′. нѣтъ.





भावं चोपदर्शयिष्यन्ति ॥ ये च ब्रह्मेन्द्रोपेन्द्ररुद्रनारायणसनत्कुमारमहेश्वरकार्तिकेयमहाकालनन्दिकेश्वरयमवरुणकुबेरहारीतीदशदिग्लोकपालाश्च सततसमितं सरात्रिंदिवं गच्छतस्तिष्ठतः शयानस्य निषण्णस्य स्वपतो जाग्रतः[1] समाहितस्यासमाहितस्य च एकाकिनो बहुजनमध्यगतस्य च यावद्ग्रामनगरनिगमजनपदराष्ट्रराजधानीमध्यगतस्येन्द्रकीलरथ्याप्रतोलीनगरद्वारवी[3]थीचत्वर[4]शृङ्गाटकनगरान्तरापणपण्यशालामध्यगतस्य यावच्छून्यागारगिरिकन्दरनदीवनगहनोपगतस्य[5] ॥ उच्छिष्टस्यानुच्छिष्टस्य मत्तस्य प्रमत्तस्य सर्वदा सर्वथा सर्वप्रकारं[6] च परां रक्षावरणगुप्तिं करिष्यन्ति ॥ रात्रिंदिवं[7] परं स्वस्त्ययनं करिष्यन्ति ॥ ये चान्ये देवनागयक्षगन्धर्वासुरगरुडकिंनरमहोरगा मनुष्यामनुष्याश्च ये चान्ये ग्रहनक्षत्रमातृगणपतयो याश्च सप्त मातरो याश्च यक्षिणीराक्षसीपिशाच्य[8]स्ताः सर्वाः सहिताः समग्राः ससैन्याः[9] सपरिवाराः सानुचराः[10] सर्वे ते रक्षावरणगुप्तिं करिष्यन्ति ॥ परं च तस्य काये ओजोबलं प्रक्षेप्स्यन्ति ॥ आरोग्यबलमायुर्वृद्धिं श्चोपसंहरिष्यन्ति ॥

चतुर्थचक्रस्येयमनुशंसा तत्पदान्येकोनविंशतिः[11] ॥

पुनरपरं वज्रपाणे वज्रधर य इमां नामसंगीतिं नामचूडामणिं प्रत्यहमखण्डसमादानतश्चिःकृत्वा कण्ठगतामावर्तयिष्यति[12] ॥ पुस्तकगतां वा पठमानः प्रवर्तयिष्यति ॥ भगवतो मञ्जुश्रीज्ञानसत्त्वस्य रूपमालम्बयन्ननुविचिन्तयंस्तद्रूपमनुध्यायन् ॥ तमेव रूपकायेनाचिरादेव धर्मविनयमुपादाय पश्यति[13] गगनतलगतांश्च सर्वबुद्धबोधिसत्त्वान्नानानिर्माणरूपकायैः सहगतान्पश्यति[14] ॥ न तस्य महासत्त्वस्य जातु कदाचित्कथमपि दुर्गत्यपायपतनं च भविष्यति ॥ नीचकुलोपपत्तिर्न भविष्यति ॥ प्रत्यन्तजनपदोपपत्तिर्न

---

1) P′. °तस्य — 2) K. нѣтъ. — 3) P′. нѣтъ. — 4) K. °राजमार्गश्चतुष्पथः शृङ्गाटकं त्रिपथः — 5) P′. °गदतोय° — 6) K. нѣтъ. — 7) K. °दिनं — 8) P′. पिशाचीराक्षस्य° — 9) K. нѣтъ. — 10) P′. нѣтъ. — 11) K. एकविंशतिरङ्कतो ऽपि २१. — 12) P′. कायकण्ठ° — 13) K. सत्त्वाशयवशात्पश्यति — 14) P′. °हय°

भविष्यति ॥ न हीनेन्द्रियो भविष्यति ॥ न विकलेन्द्रियो भविष्यति ॥ न मिथ्यादृष्टिकुलोपपत्तिर्भविष्यति ॥ नाबुद्धेषु बुद्धक्षेत्रेषूपपद्यते[1] ॥ न बुद्धोत्पाददेशितधर्मविमुखपरोक्षता भविष्यति ॥ न च दीर्घायुष्केषु देवेषूपपद्यते[1] ॥ न च दुर्भिक्षरोगशस्त्रान्तरकल्पेषूपपद्यते[1] ॥ न च पञ्चकषायकालेषूपपद्यते[1] ॥ न च राजशत्रुचौरभयं भविष्यति ॥ न च सर्ववैकल्यदारिद्र्यभयं[2] ॥ न चाश्लोकाभ्याख्याननिन्दायशोऽकीर्तिभयं भविष्यति ॥ सुजातिकुलगोत्रसंपन्नश्च लोकानां[3] भविष्यति ॥ समन्तप्रासादिकरूपवर्णसमन्वागतो भविष्यति ॥ प्रियो मनआपसुखसंवासप्रियदर्शनश्च[3] लोकानां भविष्यति ॥ शुभसौभाग्यादेयवाक्यश्च सत्त्वानां[4] भविष्यति ॥ स यत्र यत्रोपपद्यते[5] तत्र तत्र जातौ जातौ जातिस्मरो भविष्यति ॥ महाभोगो महापरिवारो ऽक्षयभोगो ऽक्षयपरिवारो भविष्यति ॥ अग्रणीः सर्वसत्त्वानामग्रगुणसमन्वागतो भविष्यति ॥ अन्यैश्चाप्रमेयैरेवंप्रकारैर्गुणगणैः[6] समन्वागतो भविष्यति ॥ प्रकृत्या च षट्पारमितागुणैः समन्वागतो भविष्यति ॥ चतुर्ब्रह्मविहारविहारी च भविष्यति ॥ स्मृतिसंप्रजन्योपायबलप्रणिधिज्ञानैः[7] समन्वागतो[8] भविष्यति ॥ सर्वशास्त्रविशारदो वाग्मी च भविष्यति ॥ स्पष्टवागजडपटुमतिर्भविष्यति ॥ दक्षो ऽनलसः संतुष्टो महार्थवितृष्णश्च भविष्यति ॥ परमविश्वासी च सर्वसत्त्वानां भविष्यति ॥ आचार्योपाध्यायगुरूणां च संमतो[9] भवति ॥ अश्रुतपूर्वाणि च तस्य शिल्पकलाभिज्ञाज्ञानशास्त्राणि चार्थतो ग्रन्थतश्च प्रतिभासमागमिष्यन्ति ॥ सुपरिशुद्धशीलाजीवसमुदाचारचारी[10] च भविष्यति ॥ सुप्रव्रजितः सर्वसंपन्नश्च[11] भविष्यति ॥ अप्रमुषितसर्वज्ञतामहाबोधिचित्तश्च भविष्यति ॥ न जातु[12] श्रावकार्हत्प्रत्येकबुद्धनियमावक्रान्तिगतश्च[13] भविष्यति ॥

पञ्चमचक्रस्येयमनुशंसा तत्पदान्येकपञ्चाशत्[14] ॥

---

1) K. °पत्स्यते — 2) K. सर्वोपकरणानां वस्त्रादीनां वैकल्यं — 3) K. нѣтъ. — 4) K. लोकस्य — 5) K. °पत्स्यते — 6) K. этой фразы нѣтъ. — 7) P′. °प्रकृति° — 8) K. °तश्च — 9) P′. संपन्नो — 10) P′. °लो जीवसमुदाचारी भवति — 11) K. सूर्यसंप° । अच्छिद्रशीलवान् । — 12) K. нѣтъ. — 13) P′. °क्रान्तपति° — 14) K. этой подписи нѣтъ.





एवं वज्रपाणे वज्रधर अप्रमेयगुणसमन्वागतो ऽसौ[1] मन्त्रमुखचर्याचारी[1] भविष्यति ॥ अन्यैश्चाप्रमेयैरेवंप्रकारैरेवंजातीयैर्[1]गुणगणैः समन्वागतो भविष्यति ॥ अचिरादेव वज्रपाणे वज्रधर परमार्थनामसंगीतिसंधारकः[2] पुरुषपुंगवः सुसंभृतपुण्यज्ञानसंभारः[3] क्षिप्रतरं बुद्धगुणान्समुदानीयानुत्तरां सम्यक्संबोधिमभिसंभोत्स्यते ॥ अनल्पकल्याणपरिनिवाणधर्मः सर्वसत्त्वानामनुत्तरधर्मदेशको ऽधिष्ठितो दशदिक्सद्धर्मदुन्दुभिर्धर्मराज इति ॥

षष्ठचक्रस्यानुशंसा तत्पदान्यप्रमेयाणि[4] ॥

ओँ सर्वधर्मा भावस्वभावविशुद्धवज्र अ आ अं अः ।
प्रकृतिपरिशुद्धाः सर्वधर्मा यदुत सर्वतथागतज्ञानकायमञ्जु-
श्रीपरिशुद्धितामुपादायेति[5] ॥
अ आः[6] सर्वतथागतहृदय हर हर ॥
ओँ हूँ ह्रीः भगवन्ज्ञानमूर्ते वागीश्वर महावाच सर्वधर्मग-
गनामलसुपरिशुद्धधर्मधातुज्ञानगर्भ आः ॥

॥ मन्त्रविन्याशः ॥

अथ वज्रधरः श्रीमां हृष्टतुष्टः कृताञ्जलिः ।
प्रणम्य नाथं संबुद्धं भगवन्तं तथागतं ॥ १ ॥

---

1) P′. нѣтъ. — 2) P′. °धारक — 3) K. सुसंभग° — 4) K. पञ्चमचक्रस्येयमनुशंसा । तत्पदानि एकपञ्चाशत् । अङ्कतो ५१ ॥ इयमसौ वज्रपाणे वज्रधरेत्यारभ्य यावद्धर्मराज इत्येताः पञ्चानुशंसा एकीकृत्य । и затѣмъ: आर्यनामसंगीतिटीकायां नाममन्त्रार्थावलोकिन्यामनुशंसाधिकारो द्वादशमः ॥ Этотъ отдѣлъ, пропущенный въ рукописяхъ, которыми пользовался издатель, былъ найденъ имъ по напечатаніи текста въ рукописи Парижской Національной Библіотеки (fond Burnouf 125). Въ каталогѣ рукопись обозначена suprabhâtastotra по заглавію послѣдняго листа; на самомъ дѣлѣ это сборникъ многихъ гимновъ. K. въ прим. обозначаетъ рук. ṭîки; см. предисловіе, стр. XII. — P′. парижскую рукопись. — 5) У. — M. °पति — 6) У. нѣтъ.

अन्यैश्चवक्रुविधैर्नाथैर्गुह्येन्द्रैर्वज्रपाणिभिः ।
स सार्धं क्रोधराजनैः[1]) प्रोवाचोच्चैरिदं वचः ॥ २ ॥
अनुमोदामहे नाथ साधु साधु सुभाषितं ।
कृतो ऽस्माकं महानर्थः सम्यक्संबोधिप्रापकः ॥ ३ ॥
जगतश्चाप्यनाथस्य विमुक्तिफलकाङ्क्षिणः ।
श्रेयो मार्गो विशुद्धो ऽयं मायाजालनयोदितः ॥ ४ ॥
गम्भीरोदारवैपुल्यो[2]) महार्थो जगदर्थकृत् ।
बुद्धानां विषयो ह्येष सम्यक्संबुद्धभाषितः ॥ ५ ॥

॥ इत्युपसंहारगाथाः पञ्च[3]) ॥

आर्यमायाजालात्षोडशसाहस्रिकान्महायोगतन्त्रान्तःपातिसमाधिजालपटलाद्भगवत्तथागतशाक्यमुनिभाषिता भगवतो मञ्जुश्रीज्ञानसत्त्वस्य परमार्था नामसंगीतिः परिसमाप्ता ॥

अ आ इ ई उ ऊ ए ऐ ओ औ अँ अः स्थितो हृदि ज्ञानमूर्तिरहं बुद्धो बुद्धानां त्र्यधवर्तिनां ओँ वज्रतीक्ष्ण दुःखच्छेद प्रज्ञाज्ञानमूर्तये ज्ञानकायवागीश्वर अरपचनाय ते नमः ॥

मङ्गलं भवतु[4]) ॥

1) Р. У. °ज°, М. °जानि — 2) У. °ल्य — 3) У. нѣтъ. — 4) М. нѣтъ.





इयमसौ वज्रपाणे वज्रधर भगवतो ज्ञानमूर्तेः सर्वतथागतज्ञानकायस्य मञ्जुश्रीज्ञानसत्त्वस्यावेणिकपरिशुद्धा नामसंगीतिस्तवानुत्तरप्रीतिप्रसादमहोद्बिल्यसंजननार्थकरी । सर्वव्याधिमहाभयप्रशमनकरी पवित्रतरा पवित्रतराणां ॥ धन्यतरा धन्यतराणां सर्वमङ्गलं माङ्गल्यानां वज्रपाणे ॥ शरणं शरणार्थिनां लयनं लयनार्थिनां त्राणं त्राणार्थिनां परायणं परायणार्थिनां ॥ दीपभूता दीपार्थिनामगतिकानां अनुत्तरगतिः ॥ सुगतानां भवसमुद्रपारगामिनां महाभिषज्यराजभूता ॥ सर्वतमोऽन्धकारकुदृष्ट्यपनयनाय चिन्तामणिराजभूता ॥ सर्वसत्त्वयथाशयाभिप्रायपरिपूरणाय सर्वज्ञज्ञानभूता ॥ पञ्चचक्षुष्प्रतिलम्भा षट्पारमितापरिपूरिता ॥ पुनरपरं वज्रपाणे वज्रधर इमां नामसंगीतिं नाम चूडामणिं प्रत्यहमखण्डसमादानतः त्रिष्कारं (?) कृत्वा कण्ठगतामावर्तयिष्यति पुस्तकगतां पठमानः प्रवर्तयिष्यति ॥ पुनरपरं वज्रपाणे न च नीचकुलोपपन्ना न च विकलेन्द्रियाश्च भविष्यन्ति न हीनेन्द्रियाश्च जायन्ते किन्तु बुद्धक्षेत्रेषूपपद्यन्ते ॥ न च दुर्भिक्षरोगशस्त्रान्तरकल्पेषूपपद्यन्ते ॥ पुनरपरं वज्रपाणे वज्रधर अप्रमेयगुणसमन्वागतश्च भविष्यति ॥ अप्रमेयविद्यासमन्वागतो भविष्यति ॥ पुनरपरं वज्रपाण इयं नामसंगीतिं धारयति वाचयति पाठयति प्रवर्तयति ॥

॥ अनुशंसास्तुतिः[1] ॥

1) Другая, краткая редакція пропущеннаго во многихъ рук. отдѣла, взята изъ рук. кембриджской университетской библіотеки (см. Bendall, Catalogue, стр. 47), Add. 1323, л. 33 об. — Рукописью кембриджской библіотеки издатель не пользовался для другихъ мѣстъ нâмасамгîти.

༄། དམ་པའི་ཆོས་ལས་འབྱུང་བའི་སྐད་གདགས་པ་ཡབ་ཡ།

~~如出中演出真正法語~~

諸經中撿出成語

༄ སངས་རྒྱས་ཀྱི་མཚན་གྱི་རྣམ་གྲངས་ལ།

諸佛名號類

| | | | | |
|---|---|---|---|---|
| bhagavān | tathāgataḥ | arhan | samyaksaṃbuddhaḥ | vidyācaraṇasampannaḥ |
| བྷ་ག་ཝཱན | ཏ་ཐཱ་ག་ཏཿ | ཨརྷན | ས་མྱཀྶཾ་བུདྡྷཿ | བི་དྱཱ་ཙ་ར་ཎ་སཾ་པནྣཿ |
| བཅོམ་ལྡན་འདས། | དེ་བཞིན་གཤེགས་པ། | དགྲ་བཅོམ་པ། | ཡང་དག་པར་རྫོགས་པའི་སངས་རྒྱས། | རིག་པ་དང་ཞབས་སུ་ལྡན་པ |
| 薄伽梵 出有壞 | 如來 | 應供 | 正徧知 | 明行足 |

[illegible]

ན་མོ་བྷ་ག་བ་ཏེ་ཤཱ་ཀྱ་མུ་ན་ཡེ་ཏ་ཐཱ་ག་ཏཱ་ཡཱརྷ་ཏེ་སམྱཀྶཾ་བུདྡྷཱ་ཡ།

བཅོམ་ལྡན་འདས་དེ་བཞིན་གཤེགས་པ་དགྲ་བཅོམ་པ་ཡང་དག་པར་རྫོགས་པའི་སངས་རྒྱས་ཤཱཀྱ་ཐུབ་པ་ལ་ཕྱག་འཚལ་ལོ།

故禮出有壞釋迦牟尼如來應正等覺

敬禮 薄伽梵 如來 應 正遍知 釋迦牟尼佛

[illegible] [illegible] [illegible] [illegible]

བིདྱཱ་ཙ་ར་ཎ་སམྤནྣཿ སུ་ག་ཏཿ ལོ་ཀ་བིད། ཨ་ནུཏྟ་རཿ པུ་རུ་ཥ་དམྱ་སཱ་ར་ཐིཿ

རིག་པ་དང་ཞབས་སུ་ལྡན་པ། བདེ་བར་གཤེགས་པ། འཇིག་རྟེན་མཁྱེན་པ། སྐྱེས་བུ་འདུལ་བའི་ཁ་ལོ་སྒྱུར་བ་བླ་ན་མེད་པ།

明 行 足 善 逝 世 間 解 無上士 調 御 丈 夫

creative commons

Attribution-NonCommercial-ShareAlike 3.0 Unported

## You are free:

**to Share** — to copy, distribute and transmit the work

**to Remix** — to adapt the work

## Under the following conditions:

**Attribution** — You must attribute the work in the manner specified by the author or licensor (but not in any way that suggests that they endorse you or your use of the work).

**Noncommercial** — You may not use this work for commercial purposes.

**Share Alike** — If you alter, transform, or build upon this work, you may distribute the resulting work only under the same or similar license to this one.

## With the understanding that:

**Waiver** — Any of the above conditions can be **waived** if you get permission from the copyright holder.

**Public Domain** — Where the work or any of its elements is in the **public domain** under applicable law, that status is in no way affected by the license.

**Other Rights** — In no way are any of the following rights affected by the license:

- Your fair dealing or **fair use** rights, or other applicable copyright exceptions and limitations;
- The author's **moral** rights;
- Rights other persons may have either in the work itself or in how the work is used, such as **publicity** or privacy rights.

**Notice** — For any reuse or distribution, you must make clear to others the license terms of this work. The best way to do this is with a link to this web page.

This is a human-readable summary of the Legal Code (the full license). Disclaimer